श्री सूर्याष्टकं

श्री सूर्याष्टकं

सांब उवाच |
आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर |
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते || 1 ||

सप्ताश्वरथमारूढं प्रचंडं कश्यपात्मजं |
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहं || 2 ||

लोहितं रथमारूढं सर्वलोकपितामहं |
महापापहरं देवं तं सूर्यं प्रणमाम्यहं || 3 ||

त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरं |
महापापहरं देवं तं सूर्यं प्रणमाम्यहं || 4 ||

बृंहितं तेजसां पुंजं वायुमाकाशमेव च |
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहं || 5 ||

बंधूकपुष्पसंकाशं हारकुंडलभूषितं |
एकचक्ररथं देवं तं सूर्यं प्रणमाम्यहं || 6 || [धरं]

तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनं |
महापापहरं देवं तं सूर्यं प्रणमाम्यहं || 7 ||

तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदं |
महापापहरं देवं तं सूर्यं प्रणमाम्यहं || 8 ||

सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनं |
अपुत्रो लभते पुत्रं दरिद्रो धनवान्भवेत् || 9 ||

आमिषं मधुपानं च यः करोति रवेर्दिने |
सप्तजन्म भवेद्रोगी जन्मजन्म दरिद्रता || 10 ||

स्त्रीतैलमधुमांसानि ये त्यजंति रवेर्दिने |
न व्याधिः शोकदारिद्र्यं सूर्यलोकं स गच्छति || 11 ||

इति श्री सूर्याष्टकं |